[1]याव्यम्, याव्यम्, यियविष्यम्-युयूष्यम्, योयूय्यम्;
ईषद्यवः-दुर्यवः-सुयवः; — — —
[2]यूयमानः, याव्यमानः, यियविष्यमाणः-युयूष्यमाणः, योयूय्यमानः;
[3]प्रयवः, [4]संयावः, [5]उद्यावः, [6]उद्यावः, [7]यवः, [8]योत्रम्, [9]यौत्रम्,
यावः, यियविषः, युयूषः, योयूयः;
यवितुम्, यावयितुम्, यियविषितुम्-युयूषितुम्, योयूयितुम्;
[10]यूतिः, यावना, यियविषा-युयूषा, योयूया;
यवनम्, यावनम्, यियविषणम्-युयूषणम्, योयूयनम्;
युत्वा, यावयित्वा, यियविषित्वा-युयूषित्वा, योयूयित्वा;
प्रयुत्य, [11]प्रयूय, प्रयाव्य, प्रयियविष्य-प्रयुयूष्य, प्रयोयूय्य;

---

1. 'आसुयुवपि—' (3-1-126) इति ण्यत्। अजन्तलक्षणयतोऽपवादः। 'धातोस्तन्निमित्तस्यैव' (6-1-80) इत्यावादेशः। आवश्यकार्थेऽपि, '**ओरावश्यके**' (3-1-125) इति ण्यति एवमेव रूपम्।
2. यकि, 'अकृत्सार्वधातुकयोः—' (7-4-25) इति दीर्घः।
3. 'ऋदोरप्' (3-3-57) इत्यप्प्रत्ययः भावे।
4. '**समि युद्रुदुवः**' (3-3-23) इति सम्युपपदे करणे घञ्। **संयावः**=पिष्टविकारोऽपूपविशेषः।
5. '**उदि श्रयतियौतिपूद्रुवः**' (3-3-49) इति घञ्।
6. 'अध्यायन्यायोद्यावसंहाराश्च' (3-3-122) इति संज्ञायां करणाधिकरणयोर्घञि निपात्यते। **उद्यावः**=भक्ष्यविशेषः।
7. यौति अत्र रसादिकमिति **यवः**=धान्यविशेषः। 'पुंसि संज्ञायां घः—' (3-3-118) इति संज्ञायां घप्रत्ययः।
8. 'दाम्नीशसयुयुज—' (3-2-182) इति करणे ष्ट्रन्प्रत्ययः। यूयतेऽनेनेति **योत्रम्**=गोपालकानां करे स्थितो दण्डविशेषः।
9. 'उणादयो बहुलम्' (3-3-1) इति ष्ट्रन्प्रत्यये, 'अचो ञ्णिति' (7-2-115) इति वृद्धिरिति **काशिका** (7-2-115)।
10. स्त्रियां क्तिनि, 'श्र्युकः किति' (7-2-11) इति इण्निषेधे, 'ऊतियूतिजूतिसातिहेतिकीर्तयश्च' (3-3-97) इति निपातनात् दीर्घः, अन्तोदात्तत्वं च। **यूतिः**=संघः, एकत्र समेषां समागमः। **गव्यूतिः**=क्रोशयुगम्।
11. छन्दसि विषये ल्यपि, '**युप्लुवोर्दीर्घः—**' (6-4-58) इति दीर्घ इति ज्ञेयम्। लोके तु तुकि **प्रयुत्य** इति भवति।